HMMCW LIBRARY

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANACOR11T-SANSKRIT (CC11)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्

### क-विभागः

1. अधो लिखितेषु प्रश्नेषु यथेच्छं <u>प्रश्नद्वयं</u> समाधेयम्। 10×2 = 20

(क) उषासूक्तस्य ऋषिः कः ? सूक्तमिदम् ऋग्वेदस्य कस्मिन् मण्डले संकलितम् ? सूक्तस्यास्य प्रतिपाद्यम् उषादेवतायाः स्वरूपं यथाधीतं वैशद्येन विव्रियताम्। 1+1+8

(ख) भवतां पाठ्यपुस्तकान्तर्गतम् अक्षसूक्तमवलम्ब्य कितवस्य विलापं समासेन विवृणुत। तत्र उपलभ्यमानस्य समाजजीवनस्य चित्रम् उपस्थाप्यताम्। 6+4

(ग) सांमनस्यसूक्तं कस्मिन् वेदे परिलक्ष्यते ? सूक्तस्यास्य ऋषिछन्दोदैवतानि समुल्लिख्य प्रधानमाहात्म्यं समासेन लिखत। 1+3+6

(घ) कः आसीत् शुनःशेपः ? तत्सम्बन्धिनीम् आख्यायिकां संक्षेपेण वर्णयित्वा अस्याख्यानस्य तात्पर्यं विशदीक्रियताम्। 1+9

2. अधः प्रदत्तेषु मन्त्रेषु ऋषिच्छन्दोदैवतविनियोगनिर्देशपुरःसरं यथेच्छं <u>मन्त्रद्वयं</u> व्याख्येयम्। 5×2 = 10

(क) अग्ने यं यज्ञमध्वरं

विश्वतः परिभूरसि।

स इद्देवेषु गच्छति॥

(ख) यः प्राणतो निमिषतो महि-

त्वैक इद्राजा जगतो बभूव।

य ईशे अस्य द्विपदश्चतुष्पदः

कस्मै देवाय हविषा विधेम॥

(ग) सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।

हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥

(घ) यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः।

यस्यां भीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात्।

सा नो भूमिर्वर्धयद् वर्धमाना॥

3. अधो लिखितेषु मन्त्रेषु यथेच्छम् एकस्य मन्त्रस्य पदपाठः विधेयः। 5×1 = 5

(क) उप त्वाग्ने दिवेदिवे

दोषावस्तर्धिया वयम्।

नमो भरन्त एमसि॥

(ख) यस्येमे हिमवन्तो महित्वा

यस्य समुद्रं रसया सहाहुः।

यस्येमाः प्रदिशो यस्य बाहू

कस्मै देवाय हविषा विधेम॥

अथवा

अधो लिखितेषु विनियोगवाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(ग) अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीय सवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

(घ) प्राजापत्यस्य पशोर्वपापुरोडाशहविषां क्रमेणादितस्तिस्रोऽनुवाक्यास्ततस्तिस्रो याज्याः।

ख-विभागः

4. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पणीं लिखत। 5×1 = 5

(क) वैदिकस्वरः।

(ख) वैदिकत्त्वार्थकप्रत्ययः।

(ग) वैदिकशब्दरूपम्।

5. अधोलिखितेषु प्रश्नेषु यथेच्छं <u>पञ्च</u> प्रश्नाः समाधेयाः। 2×5 = 10

(क) वैदिकवाङ्मये रात्रिशब्दस्य प्रयोगः कथं भवति ? एकमुदाहरणं दीयताम्।

(ख) ''विप्रासो मतिभिर्जरन्ते'' इत्यत्र विप्रासः इति पदं कथं जायते ? केन च सूत्रेण ?

(ग) 'देवेभिः' 'सचस्वा' चेति द्वयोः वैदिकपदयोः लौकिकं रूपं लिखत।

(घ) वैदिकवाङ्मये प्रयुक्तस्य तुमुन् प्रत्ययस्य उदाहरणद्वयं लिखत।

(ङ) वैदिकवाङ्मये लेट्लकारस्य प्रयोगः कदा भवति ? एकमुदाहरणं दीयताम्।

(च) ''हित्वाय अवद्यं पुनरस्तमेहि'' इत्यत्र हित्वाय इति रूपं कथं जायते ?

(छ) 'श्रियाम्' इति वैदिकपदस्य, 'महिना' इति वैदिकपदस्य च लौकिकं रूपं लिखत।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——